ॐ श्रीरस्तु श्रीगुरुभ्यो नमः हरिः ॐ

# श्रीरुद्रम् चमकम् च

(क्रमपाठः)



# Shreerudram & Chamakam
# The Krama form of chanting

(in sanskrit devanagari script with swarah)

Editor:
**Dr. R. Swami Narayanaswami**

Digital Transcription:
**Jyothirmayi**

Technical assistance & design:
ViswaPrabha

based on the Malayalam language edition of the books,

"Gomathyambaa Sametha Shree Satyavageeshwaraswamysannidhau Samarpithoyam
**ShreeRudraChamaka KramaPatah (Saswaram)**"
by
**Dr. M. Sambasivan**
Trivandrum, Kerala, India

and

**ShreeRudraKramaPatah and ShreeChamakaKramaPatah**
(with Swara)
Compiled and Composed by
**Sri N. V. Ramachandran,**
Nurani, Palghat, Kerala,
**India**
&
South Asian Studies Department,
University of Wisconsin, USA

# श्रीरुद्रक्रमपाठः

ॐ गणानां त्वा		त्वा गणपतिं

गणपतिगुं हवामहे		गणपतिमिति गण-पतिं

हवामहे कविं		कविं कवीनां

कवीनामुपमश्रवस्तमं		उपमश्रवस्तममित्युपमश्रवः तमं

ज्येष्ठराजं ब्रह्मणां		ज्येष्ठराजमिति ज्येष्ठ -राजं

ब्रह्मणां ब्रह्मणः		ब्रह्मणस्पते

पत आ		आ नः

नश्शृण्वन्		शृण्वन्नूतिभिः

ऊतिभिस्सीद		ऊतिभिरित्यूति-भिः

सीद सादनं		सादनमिति सादनं

# प्रथमोऽनुवाकः

**॥ ॐ नमो भगवते रुद्राय ॥**

| | |
|---|---|
| ॐ नम॑स्ते | ते रु॒द्र |
| रु॒द्र॒ म॒न्यवे᳚ | म॒न्यव॑ उ॒तो |
| उ॒तो ते᳚ | उ॒तो इत्यु॒तो |
| त॒ इष॑वे | इष॑वे॒ नम॑ः |
| नम॒ इति॒ नम॑ः | नम॑स्ते |
| ते॒ अ॒स्तु | अ॒स्तु॒ धन्व॑ने |
| धन्व॑ने बा॒हुभ्या᳚म् | बा॒हुभ्या॑मु॒त |
| बा॒हुभ्या॒मिति॑ बा॒हु-भ्या॒म् | उ॒त ते᳚ |

| | |
|---|---|
| ते॒ नम॑ः | नम॒ इति॒ नम॑ः |
| या ते᳚ | त॒ इषु॑ः |
| इषु॑श्शि॒वत॑मा | शि॒वत॑मा शि॒वम् |
| शि॒वत॒मेति॑ शि॒व-त॒मा | शि॒वं ब॒भूव॑ |
| ब॒भूव॑ ते | ते॒ धनु॑ः |
| धनु॒रिति॒ धनु॑ः | शि॒वा श॑र॒व्या᳚ |
| श॒र॒व्या॑ या | या तव॑ |
| तव॒ तया᳚ | तया॑ नः |
| नो॒ रु॒द्र | रु॒द्र॒ मृ॒डय |
| मृ॒डयेति॑ मृडय | या ते᳚ |
| ते॒ रु॒द्र | रु॒द्र॒ शि॒वा |
| शि॒वा त॒नूः | त॒नूरघो॑रा |
| अघो॒रापा॑पकाशिनी | अपा॑पकाशि॒नीत्यपा॑प - का॒शि॒नी |
| तया॑ नः | न॒स्त॒नुवा᳚ |
| त॒नुवा॒ शन्त॑मया | शन्त॑मया॒ गिरि॑शन्त |
| शन्त॑म॒येति॒ शं-त॒म॒या | गिरि॑शन्ता॒भि |

| | |
|---|---|
| गिरिशन्तेति गिरि-शन्त | अभिचाकशीहि |
| चाकशीहीति चाकशीहि | यामिषुं |
| इषुं गिरिशन्त | गिरिशन्त हस्ते |
| गिरिशन्तेति गिरि-शन्त | हस्ते बिभर्षि |
| बिभर्ष्यस्तवे | अस्तव इत्यस्तवे |
| शिवाङ्गिरित्र | गिरित्रतां |
| गिरित्रेति गिरि-त्र | तां कुरु |
| कुरु मा | मा हिगुंसीः |
| हिगुंसीः पुरुषं | पुरुषञ्जगत् |
| जगदिति जगत् | शिवेन वचसा |
| वचसा त्वा | त्वा गिरिश |
| गिरिशाच्छ | अच्छावदामसि |
| वदामसीति वदामसि | यथानः |
| नस्सर्वं | सर्वमित् |
| इज्जगत् | जगदयक्ष्मं |
| अयक्ष्मगुं सुमनाः | सुमना असत् |

| | |
|---|---|
| सुमना इतिसु-मनाः | असदित्यसत् |
| अध्यवोचत् | अवोचदधिवक्ता |
| अधिवक्ता प्रथमः | अधिवक्तेत्यधि-वक्ता |
| प्रथमो दैव्यः | दैव्यो भिषक् |
| भिषगिति भिषक् | अहीगुंश्च |
| च सर्वान् | सर्वान् जंभयन्न् |
| जंभयन्थ्सर्वाः | सर्वाश्च |
| च यातुधान्यः | यातुधान्य इति यातु-धान्यः |
| असौ यः | यस्ताम्रः |
| ताम्रो अरुणः | अरुण उत |
| उत बभ्रुः | बभ्रुस्सुमंगलः |
| सुमङ्गल इति सु-मङ्गलः | ये च |
| चे मां | इमागुं रुद्राः |
| रुद्रा अभितः | अभितो दिक्षु |
| दिक्षुश्श्रिताः | श्रितास्सहस्रशः |
| सहस्रशोव | सहस्रश इति सहस्र-शः |
| अवैषां | एषागुं हेडः |

| | |
|---|---|
| हेड॑ ईमहे | ई॒म॒ह॒ इती॑महे |
| अ॒सौ यः | यो॑व॒सर्प्प॑ति |
| अ॒व॒सर्प॑ति॒ नील॑ग्रीवः | अ॒व॒सर्प॒तीत्य॑व-सर्प॑ति |
| नील॑ग्रीवो॒ विलो॑हितः | नील॑ग्रीव॒ इति॒ नील॑-ग्री॒वः |
| विलो॑हित॒ इति॒वि॑-लो॒हि॒तः | उ॒तैन᳚ं |
| ए॒नं॒ गो॒पाः | गो॒पा अ॑दृशन्न् |
| गो॒पा इति॑ गो- पाः | अ॒दृ॒श॒न्न॑दृशन्न् |
| अ॑दृशन्नुदहा॒र्यः॑ | उ॒द॒हा॒र्यः॑ इत्यु॑द-हा॒र्यः॑ |
| उ॒तैन᳚ं | ए॒नं॒ विश्वा᳚ |
| विश्वा॑भू॒तानि॑ | भू॒तानि॒ सः |
| स दृ॒ष्टः | दृ॒ष्टो मृ॑डयाति |
| मृ॒ड॒या॒ति॒ नः॒ | न॒ इति॑ नः |
| नमो॑ अस्तु | अ॒स्तु॒ नील॑ग्रीवाय |
| नील॑ग्रीवाय सहस्रा॒क्षाय॑ | नील॑ग्रीवा॒येति॒ नील॑-ग्री॒वा॒य |
| स॒ह॒स्रा॒क्षाय॑ मी॒ढुषे᳚ | स॒ह॒स्रा॒क्षायेति॑ सहस्र-अ॒क्षाय॑ |
| मी॒ढुष॒ इति॑ मी॒ढुषे᳚ | अथो॒ ये |

| | |
|---|---|
| अथो॒ इत्यथो᳚ | ये अ॑स्य |
| अ॒स्य॒ सत्वा॑नः | सत्वा॑नो॒हं |
| अ॒हन्तेभ्यः॑ | तेभ्यो॑ऽकरं |
| अ॒क॒र॒न्नमः॑ | नम॒ इति॒नमः॑ |
| प्रमु॑ञ्च | मु॒ञ्च धन्व॑नः |
| धन्व॑न॒स्त्वं | त्वमु॒भयो᳚ः |
| उ॒भयो॒रार्त्नि॑योः | आर्त्नि॑यो॒र्ज्यां |
| ज्यामि॒ति॒ज्यां | या॒ श्च॑ |
| च॒ ते॒ | ते॒ हस्ते᳚ |
| हस्त॒ इष॑वः | इष॑वः परा᳚ |
| परा॒ ताः | ता भ॑गवः |
| भ॒ग॒वो॒ व॒प | भ॒ग॒व॒ इति॑ भग -वः॒ |
| व॒पेति॑ वप | अ॒व॒तत्य॒धनुः॑ |
| अ॒वतत्येत्य॑व-तत्य॑ | ध॒नुस्त्वं |
| त्वगुं सह॑स्राक्ष | सह॑स्राक्ष॒ शते॑षुधे |
| सह॑स्रा॒क्षेति॒- सहस्र अ॒क्ष | शते॑षुध॒ इति॒ शत- इ॒षु॒धे |

| | |
|---|---|
| निशीर्य शल्यानां | निशीर्येति नि -शीर्य |
| शल्यानां मुखा | मुखा शिवः |
| शिवोनः | न स्सुमनाः |
| सुमना भव | सुमना इतिसु -मनाः |
| भवेति भव | विज्यन्धनुः |
| विज्यमिति वि-ज्यं | धनुः कपर्दिनः |
| कपर्दिनो विशल्यः | विशल्यो बाणवान् |
| विशल्य इति वि-शल्यः | बाणवागुं उत |
| बाणवानिति बाण- वान् | उतेत्युत |
| अनेशन्नस्य | अस्येषवः |
| इषव आभुः | आभुरस्य |
| अस्य निषङ्गथिः | निषङ्गथिरिति निषङ्गथिः |
| या ते | ते हेतिः |
| हेतिर्मीढुष्टम | मीढुष्टम हस्ते |
| मीढुष्टमेति मीढुः -तम | हस्ते बभूव |

| | |
|---|---|
| बभूवते | ते धनुः |
| धनुरिति धनुः | तयास्मान् |
| अस्मान् विश्वतः | विश्वतस्त्वं |
| त्वमयक्ष्मया | अयक्ष्मया परि |
| परिब्भुज | भुजेति भुज |
| नमस्ते | ते अस्तु |
| अस्त्वायुधाय | आयुधायानातताय |
| अनातताय धृष्णवे | अनाततायेत्यना-तताय |
| धृष्णव इति धृष्णवे | उभाभ्यामुत |
| उत ते | ते नमः |
| नमो बाहुभ्यां | बाहुभ्यान्तव |
| बहुभ्यामिति बाहु-भ्यां | तव धन्वने |
| धन्वन इति धन्वने | परि ते |
| ते धन्वनः | धन्वनो हेतिः |
| हेतिरस्मान् | अस्मान्वृणक्तु |
| वृणक्तु विश्वतः | विश्वत इति विश्वतः |

| | |
|---|---|
| अथो॒ यः | अथो॒ इत्यथो᳚ |
| य इ॑षु॒धिः | इ॒षु॒धिस्तव॑ |
| इ॒षु॒धिरितीषु॑-धिः | तवा॒रे |
| आ॒रे अ॒स्मत् | अ॒स्मन्नि |
| निधे॑हि | धे॒हि॒ तं |
| तमि॑ति॒ तं | |

## द्वितीयोऽनुवाकः

| | |
|---|---|
| नमो॒ हिर॑ण्य बाहवे | हिर॑ण्य बाहवे सेना॒न्ये᳚ |
| हिर॑ण्य बाहव॒ इ॒ति॒हिर॑ण्य बा॒ह॒वे | से॒ना॒न्ये॑ दि॒शां |
| से॒ना॒न्य॑ इति॑ सेना-न्ये᳚ | दि॒शाञ्च॑ |
| च॒ पत॑ये | पत॑ये॒ नमः॑ |
| नमो॒ नमः॑ | नमो॑ वृ॒क्षेभ्यः॑ |
| वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः | हरि॑केशेभ्यः पशू॒नां |
| हरि॑केशेभ्य॒ इ॒ति॒ हरि॑ के॒शे॒भ्यः॒ | प॒शू॒नां पत॑ये |
| पत॑ये॒ नमः॑ | नमो॒ नमः॑ |
| नम॑स्स॒स्पिञ्ज॑राय | स॒स्पिञ्ज॑राय॒ त्विषी॑मते |
| त्विषी॑मते पथी॒नां | त्विषी॑मत॒ इ॒ति॒ त्विषि॑- म॒ते |
| प॒थी॒नां पत॑ये | पत॑ये॒ नमः॑ |
| नमो॒ नमः॑ | नमो॑ बभ्लु॒शाय॑ |
| ब॒भ्लु॒शाय॑ विव्या॒धिने᳚ | वि॒व्या॒धिनेऽन्ना॑नां |
| वि॒व्या॒धि॒न॒ इति॑ वि -व्या॒धिने᳚ | अन्ना॑नां॒ पत॑ये |
| पत॑ये॒ नमः॑ | नमो॒ नमः॑ |
| नमो॒ हरि॑केशाय | हरि॑केशायोपवी॒तिने᳚ |
| हरि॑ केशा॒येति॒ हरि॑ -के॒शा॒य | उ॒प॒वी॒तिने॑ पुष्टा॒नां᳚ |
| उ॒प॒वी॒ति॒न इ॒त्यु॑प - वी॒तिने᳚ | पु॒ष्टा॒नां पत॑ये |
| पत॑ये॒ नमः॑ | नमो॒ नमः॑ |
| नमो॑ भ॒वस्य॑ | भ॒वस्य॑ हे॒त्यै |
| हे॒त्यै जग॑तां | जग॑तां॒ पत॑ये |
| पत॑ये॒ नमः॑ | नमो॒ नमः॑ |

| | |
|---|---|
| नमो॑ रु॒द्राय॑ | रु॒द्राया॑तता॒विने᳚ |
| आ॒त॒ता॒वि॑ने॒ क्षेत्रा॑णां | आ॒त॒ता॒वि॒न इत्या᳚ - त॒ता॒वि॑ने᳚ |
| क्षेत्रा॑णां॒ पत॑ये | पत॑ये॒ नम॑ः |
| नमो॒ नम॑ः | नम॑स्सू॒ताय॑ |
| सू॒तायाह॑न्त्याय | अह॑न्त्याय॒ वना॑नां |
| वना॑नां॒ पत॑ये | पत॑ये॒ नम॑ः |
| नमो॒ नम॑ः | नमो॒ रोहि॑ताय |
| रोहि॑ताय स्थ॒पत॑ये | स्थ॒पत॑ये वृ॒क्षाणा᳚ं |
| वृ॒क्षाणां॒ पत॑ये | पत॑ये॒ नम॑ः |
| नमो॒ नम॑ः | नमो॑ म॒न्त्रिणे᳚ |
| म॒न्त्रिणे॑ वाणि॒जाय॑ | वा॒णि॒जाय॒ कक्षा॑णां |
| कक्षा॑णां॒ पत॑ये | पत॑ये॒ नम॑ः |
| नमो॒ नम॑ः | नमो॑ भु॒वन्तये᳚ |
| भु॒वन्त॑ये वारिवस्कृ॒ताय॑ | वा॒रि॒व॒स्कृ॒तायौष॑धीनां |
| वा॒रि॑वस्कृ॒तायेति॑ वारिवः - कृ॒ताय॑ | ओष॑धीनां॒ पत॑ये |
| पत॑ये॒ नम॑ः | नमो॒ नम॑ः |

| | |
|---|---|
| नम॑ उ॒च्चैर्घो॑षाय | उ॒च्चैर्घो॑षायाक्र॒न्दय॑ते |
| उ॒च्चैर्घो॑षा॒येत्यु॒च्चैः घो॒षा॒य | आ॒क्र॒न्दय॑ते पत्ती॒नां |
| आ॒क्र॒न्दय॑त॒ इत्या᳚ - क्र॒न्दय॑ते | प॒त्तीनां॒ पत॑ये |
| पत॑ये॒ नम॑ः | नमो॒ नम॑ः |
| नम॑ःकृथ्स्न वी॒ताय॑ | कृ॒थ्स्नवी॒ताय॒ धाव॑ते |
| कृ॒थ्स्नवी॒तायेति॑ कृथ्स्न - वी॒ताय॑ | धाव॑ते॒ सत्व॑नां |
| सत्व॑नां॒ पत॑ये | पत॑ये॒ नम॑ः |
| नम॒ इति॒ नम॑ः | |

## तृतीयोऽनुवाकः

| | |
|---|---|
| न॒म॒स्सह॑मानाय | सह॑मानाय निव्या॒धिने᳚ |
| नि॒व्या॒धिन॑ आव्या॒धिनी॑नां | नि॒व्या॒धि॒न इति॑ नि -व्या॒धिने᳚ |
| आ॒व्या॒धिनी॑नां॒ पत॑ये | आ॒व्या॒धिनी॒नामित्या᳚-व्या॒धिनी॑नां |
| पत॑ये॒ नम॑ः | नमो॒ नम॑ः |

| | |
|---|---|
| नम॑: ककु॒भाय॑ | ककु॒भाय॑ निष॒ङ्गिणे᳚ |
| नि॒ष॒ङ्गिणे᳚ स्ते॒नानां᳚ | नि॒ष॒ङ्गिण॒ इति॑ नि -स॒ङ्गिने᳚ |
| स्ते॒नाना॒ं पत॑ये | पत॑ये॒ नम॑: |
| नमो॒ नम॑: | नमो॑ निष॒ङ्गिणे᳚ |
| नि॒ष॒ङ्गिण॑ इषुधि॒मते᳚ | नि॒ष॒ङ्गिण॒ इति॑ नि -स॒ङ्गिने᳚ |
| इ॒षु॒धि॒मते॒ तस्क॑राणां | इ॒षु॒धि॒मत॒ इती॑षुधि - मते᳚ |
| तस्क॑राणा॒ं पत॑ये | पत॑ये॒ नम॑: |
| नमो॒ नम॑: | नमो॒ वञ्च॑ते |
| वञ्च॑ते परि॒वञ्च॑ते | प॒रि॒वञ्च॑ते स्तायू॒नां |
| प॒रि॒वञ्च॑त॒ इति॒परि-वञ्च॑ते | स्ता॒यू॒नां पत॑ये |
| पत॑ये॒ नम॑: | नमो॒ नम॑: |
| नमो॑ नि॒चेर॑वे᳚ | नि॒चे॒र॒वे॑ परिच॒राय॑ |
| नि॒चे॒र॒व॒ इति॑ नि -चे॒रवे᳚ | प॒रि॒च॒रायार॑ण्यानां |
| प॒रि॒च॒राये॒ति॑ परि -च॒राय॑ | अर॑ण्याना॒ं पत॑ये |
| पत॑ये॒ नम॑: | नमो॒ नम॑: |

| | |
|---|---|
| नम॒स्सृका॒विभ्य॑: | सृ॒का॒विभ्यो॒ जिघाग्ं॑सद्भ्यः |
| सृ॒का॒विभ्य॒ इति॑ सृका॒वि -भ्य॒: | जिघाग्ं॑सद्भ्यो मुष्ण॒तां |
| जिघाग्ं॑सद्भ्य॒ इति॒ जिघाग्ं॑सत्-भ्य॒: | मु॒ष्ण॒तां पत॑ये |
| पत॑ये॒ नम॑: | नमो॒ नम॑: |
| नमो॑ऽसि॒मद्-भ्य॑: | अ॒सि॒मद्भ्यो॒ नक्तं᳚ |
| अ॒सि॒मद्भ्य॒ इत्य॑सि॒मत्-भ्य॒: | नक्त॒ञ्चर॑द्भ्यः |
| चर॑द्भ्यः प्रकृ॒न्तानां᳚ | चर॑द्भ्य॒ इति॒ चर॑त् -भ्य॒: |
| प्र॒कृ॒न्ताना॒ं पत॑ये | प्र॒कृ॒न्ताना॒मिति॑ प्र -कृ॒न्तानां᳚ |
| पत॑ये॒ नम॑: | नमो॒ नम॑: |
| नम॑ उष्णी॒षिणे᳚ | उ॒ष्णी॒षिणे॑ गिरिच॒राय॑ |
| गि॒रि॒च॒राय॑ कुलु॒ञ्चानां᳚ | गि॒रि॒च॒राये॒ति॑ गिरि - च॒राय॑ |
| कु॒लु॒ञ्चाना॒ं पत॑ये | पत॑ये॒ नम॑: |
| नमो॒ नम॑: | नम॑ इषु॒मद्भ्यः |
| इ॒षु॒मद्भ्यो॑ धन्वा॒विभ्य॑: | इ॒षु॒मद्भ्य॒ इती॑षु॒मत् -भ्य॒: |
| ध॒न्वा॒विभ्य॑श्च | ध॒न्वा॒विभ्य॒ इति॑ धन्वा॒वि -भ्य॒: |
| च॒ व॒: | वो॒ नम॑: |

नमो नमः
नम आतन्वानेभ्यः
आतन्वानेभ्यः प्रतिदधानेभ्यः
आतन्वानेभ्य इत्या -तन्वानेभ्यः
प्रतिदधानेभ्यश्च
प्रतिदधानेभ्य इति प्रति-दधानेभ्यः
च वः
वो नमः
नमो नमः
नम आयच्छद्भ्यः
आयच्छद्भ्यो विसृजद्भ्यः
आयच्छद्भ्य इत्यायच्छत्-भ्यः
विसृजद्भ्यश्च
विसृजद्भ्य इति विसृजत्-भ्यः
च वः
वो नमः
नमो नमः
नमो ऽस्यद्भ्यः
अस्यद्भ्यो विद्ध्यद्भ्यः
अस्यद्भ्य इत्यस्यद् - भ्यः
विद्ध्यद्भ्यश्च
विद्ध्यद्भ्य इतिविद्ध्यत्-भ्यः
च वः
वो नमः
नमो नमः
नम आसीनेभ्यः
आसीनेभ्यश्शयानेभ्यः
शयानेभ्यश्च
च वः
वो नमः
नमो नमः
नमस्स्वपद्भ्यः
स्वपद्भ्यो जाग्रद्भ्यः
स्वपद्भ्य इति स्वपत् - भ्यः
जाग्रद्भ्यश्च
जाग्रद्भ्य इति जाग्रत्- भ्यः

च वः
वो नमः
नमो नमः
नमस्तिष्ठद्भ्यः
तिष्ठद्भ्यो धावद्भ्यः
तिष्ठद्भ्य इति तिष्ठत्-भ्यः
धावद्भ्यश्च
धावद्भ्य इति धावत् - भ्यः
च वः
वो नमः
नमो नमः
नमस्सभाभ्यः
सभाभ्यस्सभापतिभ्यः
सभापतिभ्यश्च
सभापतिभ्य इति सभापति -भ्यः
च वः
वो नमः
नमो नमः
नमो अश्वेभ्यः
अश्वेभ्योऽश्वपतिभ्यः
अश्वपतिभ्यश्च
अश्वपतिभ्य इत्यश्वपति -भ्यः
च वः
वो नमः
नम इति नमः

## चतुर्थोऽनुवाकः

नम आव्याधिनीभ्यः
आव्याधिनीभ्यो विविद्ध्यन्तीभ्यः

| | |
|---|---|
| आव्याधिनीभ्य इत्या व्याधिनीभ्यः | विविध्यन्तीभ्यश्च |
| विविध्यन्तीभ्य इति वि-विध्यन्तीभ्यः | च वः |
| वो नमः | नमो नमः |
| नम उगणाभ्यः | उगणाभ्यस्तृगुं हतीभ्यः |
| तृगुं हतीभ्यश्च | च वः |
| वो नमः | नमो नमः |
| नमो गृत्सेभ्यः | गृत्सेभ्यो गृत्सपतिभ्यः |
| गृत्सपतिभ्यश्च | गृत्सपतिभ्य इति गृत्सपति -भ्यः |
| च वः | वो नमः |
| नमो नमः | नमो व्रातेभ्यः |
| व्रातेभ्यो व्रातपतिभ्यः | व्रातपतिभ्यश्च |
| व्रातपतिभ्य इति व्रातपति -भ्यः | च वः |
| वो नमः | नमो नमः |
| नमो गणेभ्यः | गणेभ्यो गणपतिभ्यः |
| गणपतिभ्यश्च | गणपतिभ्य इति गणपति -भ्यः |
| च वः | वो नमः |
| नमो नमः | नमो विरूपेभ्यः |

| | |
|---|---|
| विरूपेभ्यो विश्वरूपेभ्यः | विरूपेभ्य इति वि-रूपेभ्यः |
| विश्वरूपेभ्यश्च | विश्वरूपेभ्य इति विश्व-रूपेभ्यः |
| च वः | वो नमः |
| नमो नमः | नमो महद्भ्यः |
| महद्भ्यः क्षुल्लकेभ्यः | महद्भ्य इति महत्-भ्यः |
| क्षुल्लकेभ्यश्च | च वः |
| वो नमः | नमो नमः |
| नमो रथिभ्यः | रथिभ्यो ऽरथेभ्यः |
| रथिभ्य इति रथि-भ्यः | अरथेभ्यश्च |
| च वः | वो नमः |
| नमो नमः | नमो रथेभ्यः |
| रथेभ्यो रथपतिभ्यः | रथपतिभ्यश्च |
| रथपतिभ्य इति रथपति -भ्यः | च वः |
| वो नमः | नमो नमः |
| नमस्सेनाभ्यः | सेनाभ्यस्सेनानिभ्यः |
| सेनानिभ्यश्च | सेनानिभ्य इति सेनानि-भ्यः |
| च वः | वो नमः |

| | |
|---|---|
| नमो॒ नम॑ः | नम॑ः क्ष॒त्तृभ्य॑ः |
| क्ष॒त्तृभ्य॑स्सङ्ग्रही॒तृभ्य॑ः | क्ष॒त्तृभ्य॒ इति॑ क्ष॒त्तृ-भ्य॒ः |
| स॒ङ्ग्र॒ही॒तृभ्य॑श्च | स॒ङ्ग्र॒ही॒तृभ्य॒ इति॑ सङ्ग्रही॒तृ-भ्य॒ः |
| च॒ व॒ः | वो॒ नम॑ः |
| नमो॒ नम॑ः | नम॒स्तक्ष॑भ्यः |
| तक्ष॑भ्यो रथका॒रेभ्य॑ः | तक्ष॑भ्य॒ इति॒ तक्ष॑-भ्य॒ः |
| र॒थ॒का॒रेभ्य॑श्च | र॒थ॒का॒रेभ्य॒ इति॑ रथ-का॒रेभ्य॑ः |
| च॒ व॒ः | वो॒ नम॑ः |
| नमो॒ नम॑ः | नम॒ः कुला॑लेभ्यः |
| कुला॑लेभ्यः क॒र्मारे᳚भ्यः | क॒र्मारे᳚भ्यश्च |
| च॒ व॒ः | वो॒ नम॑ः |
| नमो॒ नम॑ः | नम॑ः पु॒ञ्जिष्टे᳚भ्यः |
| पु॒ञ्जिष्टे᳚भ्यो नि॒षा॒देभ्य॑ः | नि॒षा॒देभ्य॑श्च |
| च॒ व॒ः | वो॒ नम॑ः |
| नमो॒ नम॑ः | नम॑ इषु॒कृद्भ्य॑ः |
| इ॒षु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑ः | इ॒षु॒कृद्भ्य॒ इती॑षु॒कृत्-भ्य॒ः |
| ध॒न्व॒कृद्भ्य॑श्च | ध॒न्व॒कृद्भ्य॒ इति॑ धन्व॒कृत्-भ्य॒ः |
| च॒ व॒ः | वो॒ नम॑ः |
| नमो॒ नम॑ः | नमो॑ मृग॒युभ्य॑ः |
| मृ॒ग॒युभ्य॑श्श्व॒निभ्य॑ः | मृ॒ग॒युभ्य॒ इति॑ मृग॒यु-भ्य॒ः |
| श्व॒निभ्य॑श्च | श्व॒निभ्य॒ इति॑ श्व॒नि-भ्य॒ः |
| च॒ व॒ः | वो॒ नम॑ः |
| नमो॒ नम॑ः | नम॒श्श्वभ्य॑ः |
| श्वभ्य॒श्श्वप॑तिभ्यः | श्वभ्य॒ इति॒ श्व-भ्य॒ः |
| श्वप॑तिभ्यश्च | श्वप॑तिभ्य॒ इति॒ श्वप॑ति-भ्य॒ः |
| च॒ व॒ः | वो॒ नम॑ः |
| नम॒ इति॒ नम॑ः | |

## पञ्चमोऽनुवाकः

| | |
|---|---|
| नमो॑ भ॒वाय॑ | भ॒वाय॑ च |
| च॒ रु॒द्राय॑ | रु॒द्राय॑ च |
| च॒ नम॑ः | नम॑श्श॒र्वाय॑ |
| श॒र्वाय॑ च | च॒ प॒शु॒पत॑ये |
| प॒शु॒पत॑ये च | प॒शु॒पत॑य॒ इति॑ पशु-पत॑ये |

| | |
|---|---|
| च॒ नमः॑ | नमो॒ नील॑ग्रीवाय |
| नील॑ग्रीवाय च | नील॑ग्रीवा॒ये॒ति॒ नील॑-ग्री॒वा॒य |
| च॒ शि॒ति॒कण्ठा॑य | शि॒ति॒कण्ठा॑य च |
| शि॒ति॒कण्ठा॒येति॑ शिति-कण्ठा॑य | च॒ नमः॑ |
| नमः॑ कप॒र्दिने᳚ | क॒प॒र्दिने॑ च |
| च॒ व्यु॑प्तकेशाय | व्यु॑प्तकेशाय च |
| व्यु॑प्तकेशा॒येति॒ व्यु॑प्त-के॒शा॒य | च॒ नमः॑ |
| नमः॑स्सहस्रा॒क्षाय॑ | स॒ह॒स्रा॒क्षाय॑ च |
| स॒ह॒स्रा॒क्षायेति॑ सहस्र-अक्षाय॑ | च॒ श॒तध॑न्वने |
| श॒तध॑न्वने च | श॒तध॑न्वन॒ इति॑ श॒त-ध॒न्व॒ने |
| च॒ नमः॑ | नमो॑ गिरि॒शाय॑ |
| गि॒रि॒शाय॑ च | च॒ शि॒पि॒वि॒ष्टाय॑ |
| शि॒पि॒वि॒ष्टाय॑ च | शि॒पि॒वि॒ष्टायेति॑ शिपि-वि॒ष्टाय॑ |
| च॒ नमः॑ | नमो॑ मी॒ढुष्ट॑माय |
| मी॒ढुष्ट॑माय च | मी॒ढुष्ट॑मा॒येति॑ मी॒ढुः -त॒मा॒य |
| चेषु॑मते | इषु॑मते च |
| इषु॑मत॒ इतीषु॑-म॒ते | च॒ नमः॑ |
| नमो॑ ह्र॒स्वाय॑ | ह्र॒स्वाय॑ च |

| | |
|---|---|
| च॒ वा॒म॒नाय॑ | वा॒म॒नाय॑ च |
| च॒ नमः॑ | नमो॑ बृह॒ते |
| बृ॒ह॒ते च॑ | च॒ वर्षी᳚यसे |
| वर्षी᳚यसे च | च॒ नमः॑ |
| नमो॑ वृ॒द्धाय॑ | वृ॒द्धाय॑ च |
| च॒ सं॒वृद्ध्व॑ने | सं॒वृद्ध्व॑ने च |
| सं॒वृद्ध्व॑न॒ इति॑ सं -वृद्ध्व॑ने | च॒ नमः॑ |
| नमो॒ अग्रि॑याय | अग्रि॑याय च |
| च॒ प्र॒थ॒माय॑ | प्र॒थ॒माय॑ च |
| च॒ नमः॑ | नम॑ आ॒शवे᳚ |
| आ॒शवे॑ च | चा॒जि॒राय॑ |
| अ॒जि॒राय॑ च | च॒ नमः॑ |
| नम॒श्शीघ्रि॑याय | शीघ्रि॑याय च |
| च॒ शीभ्या॑य | शीभ्या॑य च |
| च॒ नमः॑ | नम॑ ऊ॒र्म्या᳚य |
| ऊ॒र्म्या᳚य च | चा॒व॒स्व॒न्या॑य |
| अ॒व॒स्व॒न्या॑य च | अ॒व॒स्व॒न्या॒येत्यव -स्व॒न्या॑य |
| च॒ नमः॑ | नमः॑स्स्रो॒त॒स्या॑य |

स्रोतस्या॑य च च द्वीप्या॑य

द्वीप्या॑य च चेति॑ च

**********

## षष्ठोऽनुवाकः

नमो॑ ज्येष्ठाय॑ ज्येष्ठाय॑ च

च कनिष्ठाय॑ कनिष्ठाय॑ च

च नम॑ः नम॑ः पूर्वजाय॑

पूर्वजाय॑ च पूर्वजायेति॑ पूर्व-जाय॑

चापरजाय॑ अपरजाय॑ च

अपरजायेत्य॑पर -जाय॑ च नम॑ः

नमो॑ मद्ध्यमाय॑ मद्ध्यमाय॑ च

चापगल्भाय॑ अपगल्भाय॑ च

अपगल्भायेत्य॑प -गल्भाय॑ च नम॑ः

नमो॑ जघन्या॑य जघन्या॑य च

च बुद्ध्नि॑याय बुद्ध्नि॑याय च

च नम॑ः नम॑स्सोभ्या॑य

सोभ्या॑य च च प्रतिसर्या॑य

प्रतिसर्या॑य च प्रतिसर्या॑येति॑ प्रति-सर्या॑य

च नम॑ः नमो॑ याम्या॑य

याम्या॑य च च क्षेम्या॑य

क्षेम्या॑य च च नम॑ः

नम॑ उर्वर्या॑य उर्वर्या॑य च

च खल्या॑य खल्या॑य च

च नम॑ः नम॒श्श्लोक्या॑य

श्लोक्या॑य च चावसान्या॑य

अवसान्या॑य च अवसान्या॑येत्य॑व -सान्या॑य

च नम॑ः नमो॑ वन्या॑य

वन्या॑य च च कक्ष्या॑य

कक्ष्या॑य च च नम॑ः

नम॑श्श्रवाय॑ श्रवाय॑ च

च प्रतिश्श्रवाय॑ प्रतिश्श्रवाय॑ च

प्रतिश्श्रवायेति॑ प्रति-श्रवाय॑ च नम॑ः

नम॑ आशुषे॑णाय आशुषे॑णाय च

आशुषे॑णायेत्याशु-सेनाय चाशुर॑थाय

आशुर॑थाय च आशुर॑थायेत्याशु -रथाय

च नमः नमश्शूराय
शूराय च चावभिन्दते
अवभिन्दते च अवभिन्दत इत्यव -भिन्दते
च नमः नमो वर्म्मिणे
वर्मिणे च च वरूथिने
वरूथिने च च नमः
नमो बिल्मिने बिल्मिने च
च कवचिने कवचिने च
च नमः नमश्श्रुताय
श्रुताय च च श्रुतसेनाय
श्रुतसेनाय च श्रुतसेनायेतिश्रुत -सेनाय
चेति च

**********

## सप्तमोऽनुवाकः

नमो दुन्दुभ्याय दुन्दुभ्याय च
चाहनन्याय आहनन्याय च
आहनन्यायेत्या -हनन्याय च नमः
नमो धृष्णवे धृष्णवे च
च प्रमृशाय प्रमृशाय च
प्रमृशायेति प्र -मृशाय च नमः
नमो दूताय दूताय च
च प्रहिताय प्रहिताय च
प्रहितायेति प्र -हिताय च नमः
नमो निषङ्गिणे निषङ्गिणे च
निषङ्गिण इति नि -सङ्गिने चेषुधिमते
इषुधिमते च इषुधिमत इतीषुधि -मते
च नमः नमस्तीक्ष्णेषवे
तीक्ष्णेषवे च तीक्ष्णेषव इति तीक्ष्ण- इषवे
चायुधिने आयुधिने च
च नमः नमस्स्वायुधाय
स्वायुधाय च स्वायुधायेति सु -आयुधाय

| | |
|---|---|
| च॒ सु॒धन्व॑ने | सु॒धन्व॑ने च |
| सु॒धन्व॒न् इति॑ सु-धन्व॑ने | च॒ नम॑ः |
| नम॒स्स्रुत्या॑य | स्रुत्या॑य च |
| च॒ पत्थ्या॑य | पत्थ्या॑य च |
| च॒ नम॑ः | नम॑ः का॒ट्या॑य |
| का॒ट्या॑य च | च॒ नी॒प्या॑य |
| नी॒प्या॑य च | च॒ नम॑ः |
| नम॒स्सूद्या॑य | सूद्या॑य च |
| च॒ स॒र॒स्या॑य | स॒र॒स्या॑य च |
| च॒ नम॑ः | नमो॑ ना॒द्याय॑ |
| ना॒द्याय॑ च | च॒ वै॒श॒न्ताय॑ |
| वै॒श॒न्ताय॑ च | च॒ नम॑ः |
| नम॒ः कू॒प्या॑य | कू॒प्या॑य च |
| चा॒व॒ट्या॑य | अ॒व॒ट्या॑य च |
| च॒ नम॑ः | नमो॒ वर्ष्या॑य |
| वर्ष्या॑य च | चा॒व॒र्ष्याय॑ |
| अ॒व॒र्ष्याय॑ च | च॒ नम॑ः |
| नमो॑ मे॒घ्या॑य | मे॒घ्या॑य च |

| | |
|---|---|
| च॒ वि॒द्यु॒त्या॑य | वि॒द्यु॒त्या॑य च |
| वि॒द्यु॒त्या॒येति॑ वि -द्यु॒त्या॑य | च॒ नम॑ः |
| नम॑ ई॒ध्रिया॑य | ई॒ध्रिया॑य च |
| चा॒त॒प्या॑य | आ॒त॒प्या॑य च |
| आ॒त॒प्या॒येत्या᳚ -त॒प्या॑य | च॒ नम॑ः |
| नमो॒ वात्या॑य | वात्या॑य च |
| च॒ रेष्मि॑याय | रेष्मि॑याय च |
| च॒ नम॑ः | नमो॑ वास्त॒व्या॑य |
| वा॒स्त॒व्या॑य च | च॒ वा॒स्तु॒पाय॑ |
| वा॒स्तु॒पाय॑ च | वा॒स्तु॒पा॒येति॑ वास्तु-पाय॑ |
| चेति॑ च | |

## अष्टमोऽनुवाकः

| | |
|---|---|
| नम॒स्सोमा॑य | सोमा॑य च |
| च॒ रु॒द्राय॑ | रु॒द्राय॑ च |
| च॒ नम॑ः | नम॑स्ता॒म्राय॑ |

| | |
|---|---|
| ता॒म्राय॑ च | चा॒रु॒णाय॑ |
| अ॒रु॒णाय॑ च | च॒ नमः॑ |
| नम॑श्श॒ङ्गाय॑ | श॒ङ्गाय॑ च |
| च॒ प॒शुप॑तये | प॒शुप॑तये च |
| प॒शुप॑त॒य इति॑ प॒शु-प॑तये | च॒ नमः॑ |
| नम॑ उ॒ग्राय॑ | उ॒ग्राय॑ च |
| च॒ भी॒माय॑ | भी॒माय॑ च |
| च॒ नमः॑ | नमो॑ अग्रे व॒धाय॑ |
| अ॒ग्रे॒व॒धाय॑ च | अ॒ग्रे॒व॒धायेत्य॑ग्रे -व॒धाय॑ |
| च॒ दू॒रे॒व॒धाय॑ | दू॒रे॒व॒धाय॑ च |
| दू॒रे॒ व॒धायेति॑ दू॒रे -व॒धाय॑ | च॒ नमः॑ |
| नमो॑ ह॒न्त्रे | ह॒न्त्रे च॑ |
| च॒ हनी॑यसे | हनी॑यसे च |
| च॒ नमः॑ | नमो॑ वृ॒क्षेभ्यः॑ |
| वृ॒क्षेभ्यो॒ हरि॑केशेभ्यः | हरि॑केशेभ्यो॒ नमः॑ |
| हरि॑केशेभ्य॒ इति॒ हरि॑ -के॒शे॒भ्यः॒ | नम॑स्ता॒राय॑ |
| ता॒राय॒ नमः॑ | नम॑श्श॒ंभवे᳚ |

| | |
|---|---|
| श॒ंभवे॑ च | श॒ंभ॒व इति॑ शं -भवे᳚ |
| च॒ म॒यो॒भवे᳚ | म॒यो॒भवे॑ च |
| म॒यो॒भ॒व इति॑ मयः - भवे᳚ | च॒ नमः॑ |
| नम॑श्शंक॒राय॑ | श॒ंक॒राय॑ च |
| श॒ंक॒रायेति॑ शं -क॒राय॑ | च॒ म॒य॒स्क॒राय॑ |
| म॒य॒स्क॒राय॑ च | म॒य॒स्क॒रायेति॑ मयः -क॒राय॑ |
| च॒ नमः॑ | नम॑श्शि॒वाय॑ |
| शि॒वाय॑ च | च॒ शि॒वत॑राय |
| शि॒वत॑राय च | शि॒वत॑रा॒येति॑ शि॒व -त॒रा॒य |
| च॒ नमः॑ | नम॒स्तीर्थ्या॑य |
| तीर्थ्या॑य च | च॒ कू॒ल्या॑य |
| कू॒ल्या॑य च | च॒ नमः॑ |
| नमः॑ पा॒र्या॑य | पा॒र्या॑य च |
| चा॒वा॒र्या॑य | अ॒वा॒र्या॑य च |
| च॒ नमः॑ | नमः॑ प्र॒तर॑णाय |
| प्र॒तर॑णाय च | प्र॒तर॑णा॒येति॑ प्र-तर॑णाय |
| चो॒त्तर॑णाय | उ॒त्तर॑णाय च |

| | |
|---|---|
| उ॒त्त॒र॑णा॒येत्यु॑त्-त॒र॑णाय | च॒ नम॑ः |
| नम॒ आता॒र्या॑य | आ॒ता॒र्या॑य च |
| आ॒ता॒र्या॑येत्या᳚ -ता॒र्या॑य | चा॒ला॒द्या॑य |
| आ॒ला॒द्या॑य च | आ॒ला॒द्या॑येत्या᳚ -ला॒द्या॑य |
| च॒ नम॑ः | नम॒श्शष्प्या॑य |
| शष्प्या॑य च | च॒ फेन्या॑य |
| फेन्या॑य च | च॒ नम॑ः |
| नम॑स्सिक॒त्या॑य | सि॒क॒त्या॑य च |
| च॒ प्र॒वा॒ह्या॑य | प्र॒वा॒ह्या॑य च |
| प्र॒वा॒ह्या॑येति॑ प्र -वा॒ह्या॑य | चेति॑ च |

❄❄❄❄❄❄❄❄❄❄

## नवमोऽनुवाकः

| | |
|---|---|
| नम॑ इरि॒ण्या॑य | इ॒रि॒ण्या॑य च |
| च॒ प्र॒प॒थ्या॑य | प्र॒प॒थ्या॑य च |
| प्र॒प॒थ्या॑येति॑ प्र -प॒थ्या॑य | च॒ नम॑ः |
| नम॑ः किगुंशि॒लाय॑ | कि॒गुं॒शि॒लाय॑ च |
| च॒ क्षय॑णाय | क्षय॑णाय च |
| च॒ नम॑ः | नम॑ः कप॒र्दिने᳚ |
| क॒प॒र्दिने॑ च | च॒ पु॒ल॒स्तये᳚ |
| पु॒ल॒स्तये॑ च | च॒ नम॑ः |
| नमो॒ गोष्ठ्या॑य | गोष्ठ्या॑यच |
| गोष्ठ्या॑येति॒ गो-स्थ्या॒य॒ | च॒ गृह्या॑य |
| गृह्या॑य च | च॒ नम॑ः |
| नम॒स्तल्प्या॑य | तल्प्या॑य च |
| च॒ गेह्या॑य | गेह्या॑य च |
| च॒ नम॑ः | नम॑ः का॒ट्या॑य |
| का॒ट्या॑य च | च॒ ग॒ह्व॒रे॒ष्ठाय॑ |
| ग॒ह्व॒रे॒ष्ठाय॑ च | ग॒ह्व॒रे॒ष्ठायेति॑ गह्वरे-स्थाय॑ |
| च॒ नम॑ः | नमो᳚ ह्र॒द॒य्या॑य |
| ह्र॒द॒य्या॑य च | च॒ नि॒वे॒ष्प्या॑य |
| नि॒वे॒ष्प्या॑य च | नि॒वे॒ष्प्या॑येति॒ नि-वे॒ष्प्या॑य |
| च॒ नम॑ः | नम॑ः पागुं॒स॒व्या॑य |
| पा॒गुं॒स॒व्या॑य च | च॒ र॒ज॒स्या॑य |

रजस्याय च
च नमः
नमश्शुष्क्याय
शुष्क्याय च
च हरित्याय
हरित्याय च
च नमः
नमो लोप्याय
लोप्याय च
चोलप्याय
उलप्याय च
च नमः
नम ऊर्व्याय
ऊर्व्याय च
च सूर्म्याय
सूर्म्याय च
च नमः
नमः पर्ण्याय
पर्ण्याय च
च पर्णशद्याय
पर्णशद्याय च
पर्णशद्यायेति पर्ण-शद्याय
च नमः
नमोऽपगुरमाणाय
अपगुरमाणाय च
अपगुरमाणायेत्यप-गुरमाणाय
चाभिघ्नते
अभिघ्नते च
अभिघ्नत इत्यभि -घ्नते
च नमः
नम आक्खिदते
आक्खिदते च
आक्खिदत इत्या -खिदते
च प्रक्खिदते
प्रक्खिदते च
प्रक्खिदत इति प्र-खिदते

च नमः
नमो वः
वः किरिकेभ्यः
किरिकेभ्यो देवानां
देवानागुं हृदयेभ्यः
हृदयेभ्यो नमः
नमो विक्षीणकेभ्यः
विक्षीणकेभ्यो नमः
विक्षीणकेभ्य इति वि - क्षीणकेभ्यः
नमो विचिन्वत्केभ्यः
विचिन्वत्केभ्यो नमः
विचिन्वत्केभ्य इति वि-चिन्वत्केभ्यः
नम आनिर् हतेभ्यः
आनिर्हतेभ्यो नमः
आनिर्हतेभ्यः इत्यानिः -हतेभ्यः
नम आमीवत्केभ्यः
आमीवत्केभ्य इत्या -मीवत्केभ्यः

## दशमोऽनुवाकः

द्रापे अन्धसः
अन्धसस्पते
पते दरिद्रत्
दरिद्रन्नीललोहित
नीललोहितेति नील -लोहित
एषां पुरुषाणां
पुरुषाणामेषां
एषां पशूनां
पशूनां मा
माभेः

| | |
|---|---|
| भेर् मा | माऽरः |
| अरो मो | मो एषां |
| मो इति मो | एषां किं |
| किञ्चन | च नाममत् |
| आममदित्याममत् | या ते |
| ते रुद्र | रुद्र शिवा |
| शिवा तनूः | तनूश्शिवा |
| शिवा विश्वाहभेषजी | विश्वाहभेषजीति विश्वाह -भेषजी |
| शिवा रुद्रस्य | रुद्रस्य भेषजी |
| भेषजी तया | तया नः |
| नो मृड | मृड जीवसे |
| जीवस इति जीवसे | इमागुं रुद्राय |
| रुद्राय तवसे | तवसे कपर्दिने |
| कपर्दिने क्षयद्वीराय | क्षयद्वीराय प्र |
| क्षयद्वीरायेति क्षयत्-वीराय | प्रभरामहे |

| | |
|---|---|
| भरामहे मतिं | मतिमिति मतिं |
| यथा नः | नश्शं |
| शमसत् | असद्द्विपदे |
| द्विपदे चतुष्पदे | द्विपद इति द्वि -पदे |
| चतुष्पदे विश्वं | चतुष्पद इति चतुः पदे |
| विश्वं पुष्टं | पुष्टं ग्रामे |
| ग्रामे अस्मिन् | अस्मिन्ननातुरं |
| अनातुरमित्यना -तुरं | मृडानः |
| नो रुद्र | रुद्रोत |
| उत नः | नो मयः |
| मयस्कृधि | कृधिक्षयद्वीराय |
| क्षयद्वीराय नमसा | क्षयद्वीरायेति क्षयत् -वीराय |
| नमसा विधेम | विधेमते |
| त इति ते | यच्छं |
| श ञ्च | च योः |
| योश्च | च मनुः |

| | |
|---|---|
| मनु॑राय॒जे | आ॒य॒जे पि॒ता |
| आ॒य॒ज इत्या᳚ -य॒जे | पि॒ताता॒त् |
| तद॑श्याम | अ॒श्या॒म॒ तव॑ |
| तव॑ रुद्र | रु॒द्र॒ प्रणी॑तौ |
| प्रणी॑ता॒विति॒ प्र -नी॒तौ॒ | मा न॑ः |
| नो॒ म॒हान्त᳚ं | म॒हान्त॑मु॒त |
| उ॒तमा | मा न॑ः |
| नो॒ अ॒र्भ॒कं | अ॒र्भ॑कं मा |
| मा न॑ः | न॒ उ॒क्ष॑न्तं |
| उ॒क्ष॑न्तमु॒त | उ॒त मा |
| मा॒ न॑ः | न॒ उ॒क्षि॒तं |
| उ॒क्षि॒तमित्यु॑क्षि॒तं | मा॒ न॑ः |
| नो॒ व॒धी॒ः | व॒धी॒ः पि॒तर᳚ं |
| पि॒तर॒ं मा | मोत |
| उ॒तमा॒तर᳚ं | मा॒तर॑ं प्रि॒याः |
| प्रि॒या मा | मा न॑ः |

| | |
|---|---|
| न॒स्त॒नुव॑ः | त॒नुवो॑ रुद्र |
| रु॒द्र॒रीरि॒षः | रीरि॒ष इति॑ रीरिषः |
| मा न॑ः | न॒स्तो॒के |
| तो॒के तन॑ये | तन॑ये॒ मा |
| मा न॑ः | न॒ आयु॑षि |
| आयु॑षि॒ मा | मा॒ न॑ः |
| नो॒ गोषु॑ | गोषु॒ मा |
| मा न॑ः | नो॒ अश्वे॑षु |
| अश्वे॑षु रीरिषः | रीरि॒ष इति॑ रीरिषः |
| वी॒रान्मा | मा न॑ः |
| नो॒ रु॒द्र॒ | रु॒द्र॒भा॒मि॒तः |
| भा॒मि॒तो व॑धीः | व॒धी॒र्ह॒विष्म॑न्तः |
| ह॒विष्म॑न्तो॒ नम॑सा | नम॑सा विधेम |
| वि॒धे॒म॒ते | त॒ इति॑ ते |
| आ॒रात्ते᳚ | ते॒ गो॒घ्ने |
| गो॒घ्न उ॒त | गो॒घ्न इति॑ गो-घ्ने |
| उ॒त॒पू॒रु॒ष॒घ्ने | पू॒रु॒ष॒घ्ने क्ष॒यद्वी॑राय |
| पू॒रु॒ष॒घ्न इति॑ पूरुष-घ्ने | क्ष॒यद्वी॑राय सु॒म्नं |

| | |
|---|---|
| क्षयद्वीरायेति क्षयत् -वीराय | सुम्नमस्मे |
| अस्मे ते | अस्मे इत्यस्मे |
| ते अस्तु | अस्त्वित्यस्तु |
| रक्षा च | च नः |
| नो अधि | अधि च |
| च देव | देव ब्रूहि |
| ब्रूह्यध | अधा च |
| च नः | नश्शर्म्म |
| शर्म्मयच्छ | यच्छद्विबर्हाः |
| द्विबर्हा इति द्वि -बर्हाः | स्तुहिश्रुतं |
| श्रुतं गर्त्तसदं | गर्त्तसदं युवानं |
| गर्त्तसदमिति गर्त्त -सदं | युवानं मृगं |
| मृगन्न | न भीमं |
| भीममुपहत्नुं | उपहत्नुमुग्रं |
| उग्रमित्युग्रं | मृडा जरित्रे |
| जरित्रे रुद्र | रुद्रस्तवानः |

| | |
|---|---|
| स्तवानो अन्यं | अन्यं ते |
| ते अस्मत् | अस्मन्नि |
| निर्वपन्तु | वपन्तु सेनाः |
| सेना इति सेनाः | परिणः |
| नो रुद्रस्य | रुद्रस्य हेतिः |
| हेतिर्वृणक्तु | वृणक्तु परि |
| परित्वेषस्य | त्वेषस्य दुर्म्मतिः |
| दुर्म्मतिरघायोः | दुर्म्मतिरिति दुः-मतिः |
| अघायोरि त्यघ -योः | अवस्थिरा |
| स्थिरा मघवद्भ्यः | मघवद्भ्यस्तनुष्व |
| मघवद्भ्य इति मघवत् -भ्यः | तनुष्व मीढ्वः |
| मीढ्वस्तोकाय | तोकाय तनयाय |
| तनयाय मृडय | मृडयेति मृडय |
| मीढुष्टम शिवतम | मीढुष्टमेति मीढुः -तम |
| शिवतम शिवः | शिवतमेतिशिव -तम |
| शिवो नः | नस्सुमनाः |

| | |
|---|---|
| सुमना भव | सुमना इति सु-मनाः |
| भवेति भव | परमे वृक्षे |
| वृक्ष आयुधं | आयुधं निधाय |
| निधाय कृत्तिं | निधायेति नि-धाय |
| कृत्तिं वसानः | वसान आ |
| आचर | चर पिनाकं |
| पिनाकं बिभ्रत् | बिभ्रदा |
| आगहि | गहीति गहि |
| विकिरिद विलोहित | विकिरिदेति वि-किरिद |
| विलोहित नमः | विलोहितेति वि-लोहित |
| नमस्ते | ते अस्तु |
| अस्तु भगवः | भगव इति भग-वः |
| यास्ते | ते सहस्रं |
| सहस्रगुं हेतयः | हेतयोऽन्यं |
| अन्यमस्मत् | अस्मन्नि |
| निर्वपन्तु | वपन्तु ताः |
| ता इति ताः | सहस्राणि सहस्रधा |
| सहस्रधा बाहुवोः | सहस्रधेति सहस्र -धा |
| बाहुवोस्तव | तव हेतयः |
| हेतय इति हेतयः | तासामीशानः |
| ईशानो भगवः | भगवः पराचीना |
| भगव इति भग-वः | पराचीना मुखा |
| मुखा कृधि | कृधीति कृधि |

## एकादशोऽनुवाकः

| | |
|---|---|
| सहस्राणि सहस्रशः | सहस्रशो ये |
| सहस्रश इति सहस्र -शः | ये रुद्राः |
| रुद्रा अधि | अधिभूम्यां |
| भूम्यामिति भूम्यां | तेषागुं सहस्रयोजने |
| सहस्रयोजनेऽव | सहस्रयोजन इति सहस्र-योजने |
| अवधन्वानि | धन्वानि तन्मसि |
| तन्मसीति तन्मसि | अस्मिन्महति |

| | |
|---|---|
| म॒ह॒त्य॑र्ण॒वे | अ॒र्ण॒वे᳚ऽन्तरि॑क्षे |
| अ॒न्तरि॑क्षे भ॒वाः | भ॒वा अधि॑ |
| अधीत्यधि॑ | नील॑ग्रीवाश्शिति॒कण्ठा᳚ः |
| नील॑ग्रीवा॒ इति॒ नील॑ -ग्री॒वा॒ः | शि॒ति॒कण्ठा᳚श्श॒र्वा॑ः |
| शि॒ति॒कण्ठा॒ इति॑ शिति-कण्ठा᳚ः | श॒र्वा॑ अ॒धः |
| अ॒धः क्ष॑माच॒राः | क्ष॒मा॒च॒रा इति॑ क्षमा-च॒राः |
| नील॑ग्रीवाश्शिति॒कण्ठा᳚ः | नील॑ग्रीवा॒ इति॒ नील॑ - ग्री॒वा॒ः |
| शि॒ति॒कण्ठा॒ दिव᳚ं | शि॒ति॒कण्ठा॒ इति॑ शिति - कण्ठा᳚ः |
| दिव॑गुं रु॒द्राः | रु॒द्रा उप॑श्रिताः |
| उप॑श्रिता॒ इत्युप॑ -श्रि॒ता॒ः | ये वृ॒क्षेषु॑ |
| वृ॒क्षेषु॑ स॒स्पिञ्ज॑राः | स॒स्पिञ्ज॑रा॒ नील॑ग्रीवाः |
| नील॑ग्रीवा॒ विलो॑हिताः | नील॑ग्रीवा॒ इति॒ नील॑ - ग्री॒वा॒ः |
| विलो॑हिता॒ इति॒ वि-लो॒हि॒ता॒ः | ये भू॒ताना᳚ं |
| भू॒ताना॒मधि॑पतयः | अधि॑पतयो वि॒शि॒खास॑ः |
| अधि॒पत॒य इत्यधि॑ -प॒त॒य॒ः | वि॒शि॒खास॑ः कप॒र्दिन॑ः |

| | |
|---|---|
| वि॒शि॒खास॒ इति॑ वि-शि॒खास॑ः | क॒प॒र्दि॒न इति॑ कप॒र्दिन॑ः |
| ये अन्ने॑षु | अन्ने॑षु वि॒विध्य॑न्ति |
| वि॒विध्य॑न्ति॒ पात्रे॑षु | वि॒विध्य॒न्तीति॑ वि - विध्य॑न्ति |
| पात्रे॑षु पिब॑तः | पिब॑तो॒ जना॑न् |
| जना॒निति॒ जना॑न् | ये प॒थां |
| प॒थां प॑थि॒रक्ष॑यः | प॒थि॒रक्ष॑य ऐलबृ॒दाः |
| प॒थि॒रक्ष॑य॒ इति॑ पथि-रक्ष॑यः | ऐ॒ल॒बृ॒दा य॒व्युधः |
| य॒व्यु॒ध इति॑ य॒व्युध॑ः | ये ती॒र्थानि॑ |
| ती॒र्थानि॑ प्र॒चर॑न्ति | प्र॒चर॑न्ति सृ॒काव॑न्तः |
| प्र॒च॒रन्तीति॑ प्र॒ - चर॑न्ति | सृ॒काव॑न्तो नि॒ष॒ङ्गिण॑ः |
| सृ॒काव॑न्त॒ इति॑ सृ॒का - व॒न्त॒ः | नि॒ष॒ङ्गिण॒ इति॑ नि -स॒ङ्गिन॑ः |
| य ए॒ताव॑न्तः | ए॒ताव॑न्तश्च |
| च॒भूया॑गुंसः | भूया॑गुंसश्च |
| च॒ दिश॑ः | दिशो॑ रु॒द्राः |
| रु॒द्रा वि॑तस्थि॒रे | वि॒त॒स्थि॒र इति॑ वि-त॒स्थि॒रे |
| तेषा॑गुं सहस्र योज॒ने | स॒ह॒स्र॒यो॒ज॒ने᳚ऽव |
| स॒ह॒स्र॒यो॒ज॒न इति॑ सहस्र - यो॒ज॒ने | अव॒धन्वा॑नि |
| धन्वा॑नि तन्मसि | त॒न्म॒सीति॑ तन्मसि |

| | |
|---|---|
| नमो॑ रु॒द्रेभ्यो॑ | रु॒द्रेभ्यो॒ ये |
| ये पृ॑थि॒व्यां | पृ॒थि॒व्यां ये |
| ये᳚ऽन्तरि॑क्षे | अ॒न्तरि॑क्षे ये |
| ये दि॒वि | दि॒वि येषां᳚ |
| येषा॒मन्नं᳚ | अन्नं॒ वात॑ः |
| वातो॑ व॒र्षं | व॒र्षमिष॑वः |
| इष॑व॒स्तेभ्यो॑ | तेभ्यो॒ दश॑ |
| दश॒ प्राचीः᳚ | प्राची॒र्दश॑ |
| दश॑ द॒क्षि॒णा | द॒क्षि॒णा दश॑ |
| दश॑ प्र॒तीचीः᳚ | प्र॒तीची॒र्दश॑ |
| दशोदी॑चीः | उदी॑ची॒र्दश॑ |
| दशो॒र्ध्वाः | ऊ॒र्ध्वास्तेभ्यः॑ |
| तेभ्यो॒ नम॑ः | न॒मस्ते |
| ते न॑ः | नो॒ मृ॒ड॒य॒न्तु |
| मृ॒ड॒य॒न्तु॒ ते | ते यं |
| यं द्वि॒ष्मः | द्वि॒ष्मो यः |

| | |
|---|---|
| यश्च॑ | च॒ न॒ः |
| नो॒ द्वेष्टि॑ | द्वेष्टि॒ तं |
| तं व॑ः | वो॒ जंभे᳚ |
| जंभे॑ दधामि | द॒धा॒मीति॑ दधामि |
| त्र्यं॑बकं यजामहे | त्र्यम्बक॒मिति॒ त्रि- अं॒ब॒कं |
| य॒जा॒म॒हे॒ सु॒गन्धिं | सु॒गन्धिं पु॑ष्टि॒वर्ध॑नं |
| सु॒गन्धि॒मिति॑ सु - ग॒न्धिं | पु॒ष्टि॒वर्ध॑न॒मिति॑ पुष्टि-वर्ध॑नं |
| उ॒र्वा॒रु॒कमि॑व | इ॒व बन्ध॑नात् |
| बन्ध॑नान्मृ॒त्योः | मृ॒त्योर्मु॑क्षीय |
| मु॒क्षी॒य॒मा | मामृता᳚त् |
| अ॒मृ॒ता॒दित्य॒मृता᳚त् | यो रु॒द्रः |
| रु॒द्रो अ॒ग्नौ | अ॒ग्नौ यः |
| यो अ॒प्सु | अ॒प्सु यः |
| अ॒प्स्वित्य॑प्-सु | य ओष॑धीषु |
| ओष॑धीषु॒ यः | यो रु॒द्रः |
| रु॒द्रो विश्वा᳚ | विश्वा॒ भुव॑ना |

| | |
|---|---|
| भुव॑नाऽऽवि॒वेश॑ | आ॒वि॒वे॒श॒ तस्मै᳚ |
| आ॒वि॒वेशेत्या᳚ -वि॒वेश॑ | तस्मै᳚ रु॒द्राय॑ |
| रु॒द्रा॒य॒ नम॑ः | नमो॑ अस्तु |
| अ॒स्त्वि॒त्य॑स्तु | |
| तं उ | उ स्तु॒हि॒ |
| स्तु॒हि॒ यः | यः स्वि॒षुः |
| स्वि॒षुस्सु॒धन्वा᳚ | स्वि॒षुरिति॑ सु॒-इ॒षुः |
| सु॒धन्वा॒ यः | सु॒धन्वेति॑ सु॒-धन्वा᳚ |
| यो विश्व॑स्य | विश्व॑स्य॒ क्षय॑ति |
| क्षय॑ति भे॒षजस्य॑ | भे॒षजस्येति॑ भे॒षजस्य॑ |
| यक्ष्वा᳚महे | म॒हे॒सौ॒म॒न॒साय॑ |
| सौ॒म॒न॒साय॑ रु॒द्रं | रु॒द्रं नमो᳚भिः |
| नमो᳚भिर्दे॒वं | नमो॑भि॒रिति॒ नम॑ः - भिः |
| दे॒वमसु॑रं | असु॑रं दुवस्य |
| दु॒व॒स्येति॑ दुवस्य | अ॒यं मे᳚ |

| | |
|---|---|
| मे॒ हस्त॑ः | हस्तो॒ भग॑वान् |
| भग॑वान॒यं | भग॑वा॒निति॒ भग॑-वान् |
| अ॒यं मे᳚ | मे॒ भग॑वत्तरः |
| भग॑वत्तर॒ इ॒ति॒ भग॑वत्-तरः | अ॒यं मे᳚ |
| मे॒ वि॒श्वभे᳚षजः | वि॒श्वभे᳚षजो॒ऽयं |
| वि॒श्वभे॑षज॒ इति॑ वि॒श्व-भे॑षजः | अ॒यं शि॒वाभि॑मर्श॑नः |
| शि॒वाभि॑मर्श॒न इति॑ शि॒व-अ॑भिमर्श॑नः | |

**ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः**



ॐ

# श्रीचमकक्रमपाठः

## प्रथमोऽनुवाकः

| | |
|---|---|
| अग्ना॑विष्णू स॒जोष॑सा | अग्ना॑विष्णू॒ इत्याग्ना᳚ -वि॒ष्णू॒ |
| स॒जोष॑से॒मा | स॒जोष॒सेति॑ स-जोष॑सा |
| इ॒माव॑र्धन्तु | व॒र्ध॒न्तु॒वां |
| वा॒ङ्गिर॑ः | गिर॒ इति॒ गिर॑ः |
| द्यु॒म्नैर्वाजे॑भिः | वाजे॑भि॒रा |
| आग॑तं | ग॒त॒मिति॑ गतं |
| वाज॑श्च | च॒ मे॒ |
| मे॒ प्र॒स॒वः | प्र॒स॒वश्च॑ |
| प्र॒स॒व इति॑ प्र -स॒वः | च॒ मे॒ |
| मे॒ प्रय॑तिः | प्रय॑तिश्च |
| प्रय॑ति॒रिति॒ प्र -य॒तिः | च॒ मे॒ |
| मे॒ प्रसि॑तिः | प्रसि॑तिश्च |
| प्रसि॑ति॒रिति॒ प्र -सि॒तिः | च॒ मे॒ |
| मे॒ धी॒तिः | धी॒तिश्च॑ |

| | |
|---|---|
| च मे | मे क्रतुः |
| क्रतुश्च | च मे |
| मे स्वरः | स्वरश्च |
| च मे | मे श्लोकः |
| श्लोकश्च | च मे |
| मे श्रावः | श्रावश्च |
| च मे | मे श्रुतिः |
| श्रुतिश्च | च मे |
| मे ज्योतिः | ज्योतिश्च |
| च मे | मे सुवः |
| सुवश्च | च मे |
| मे प्राणः | प्राणश्च |
| प्राण इति प्र -अनः | च मे |
| मेऽपानः | अपानश्च |
| अपान इत्यप -अनः | च मे |
| मे व्यानः | व्यानश्च |
| व्यान इति वि -अनः | च मे |
| मेऽसुः | असुश्च |

| | |
|---|---|
| च मे | मे चित्तं |
| चित्तं च | च मे |
| म आधीतं | आधीतञ्च |
| आधीतमित्या -धीतं | च मे |
| मे वाक् | वाक् च |
| च मे | मे मनः |
| मनश्च | च मे |
| मे चक्षुः | चक्षुश्च |
| च मे | मे श्रोत्रं |
| श्रोत्रञ्च | च मे |
| मे दक्षः | दक्षश्च |
| च मे | मे बलं |
| बलञ्च | च मे |
| म ओजः | ओजश्च |
| च मे | मे सहः |
| सहश्च | च मे |
| म आयुः | आयुश्च |

च॒ मे॒
मे॒ ज॒रा
ज॒रा च॑
च॒ मे॒
म॒ आ॒त्मा
आ॒त्मा च॑
च॒ मे॒
मे॒ त॒नूः
त॒नूश्च॑
च॒ मे॒
मे॒ शर्म॑
शर्म॑ च
च॒ मे॒
मे॒ वर्म॑
वर्म॑ च
च॒ मे॒
मेऽङ्गा॑नि
अङ्गा॑नि च
च॒ मे॒
मे॒ऽस्थानि॑
अ॒स्थानि॑ च
च॒ मे॒
मे॒ परू॑ꣳषि
परू॑ꣳषि च
च॒ मे॒
मे॒ शरी॑राणि
शरी॑राणि च
च॒ मे॒
म॒ इति॑ मे

*********

## द्वितीयोऽनुवाकः

ज्यैष्ठ्य॑ञ्च
च॒ मे॒
म॒ आधि॑पत्यं
आधि॑पत्यञ्च
आधि॑पत्य॒मित्याधि॑-प॒त्यं
च॒ मे॒
मे॒ म॒न्युः
म॒न्युश्च॑
च॒ मे॒
मे॒ भाम॑ः
भाम॑श्च
च॒ मे॒
मेऽम॑ः
अम॑श्च
च॒ मे॒
मेऽम्भ॑ः
अम्भ॑श्च
च॒ मे॒
मे॒ जे॒मा
जे॒मा च॑
च॒ मे॒
मे॒ म॒हि॒मा
म॒हि॒मा च॑
च॒ मे॒
मे॒ व॒रि॒मा
व॒रि॒मा च॑
च॒ मे॒
मे॒ प्र॒थि॒मा
प्र॒थि॒मा च॑
च॒ मे॒
मे॒ व॒र्ष्मा
व॒र्ष्मा च॑

| | |
|---|---|
| च॒ मे॒ | मे॒ द्रा॒घु॒या |
| द्रा॒घु॒या च॑ | च॒ मे॒ |
| मे॒ वृ॒द्धं | वृ॒द्धञ्च॑ |
| च॒ मे॒ | मे॒ वृद्धि॑ः |
| वृद्धि॑श्च | च॒ मे॒ |
| मे॒ स॒त्यं | स॒त्यञ्च॑ |
| च॒ मे॒ | मे॒ श्र॒द्धा |
| श्र॒द्धा च॑ | श्र॒द्धेति॑ श्रत् -धा |
| च॒ मे॒ | मे॒ जग॑त् |
| जग॑च्च | च॒ मे॒ |
| मे॒ धनं॓ | धन॑ञ्च |
| च॒ मे॒ | मे॒ वश॑ः |
| वश॑श्च | च॒ मे॒ |
| मे॒ त्विषि॑ः | त्विषि॑श्च |
| च॒ मे॒ | मे॒ क्री॒डा |
| क्री॒डा च॑ | च॒ मे॒ |
| मे॒ मोद॑ः | मोद॑श्च |

| | |
|---|---|
| च॒ मे॒ | मे॒ जा॒तं |
| जा॒तञ्च॑ | च॒ मे॒ |
| मे॒ ज॒नि॒ष्यमा॑णं | ज॒नि॒ष्यमा॑णञ्च |
| च॒ मे॒ | मे॒ सू॒क्तं |
| सू॒क्तञ्च॑ | सू॒क्तमिति॑ सु- उ॒क्तं |
| च॒ मे॒ | मे॒ सु॒कृ॒तं |
| सु॒कृ॒तञ्च॑ | सु॒कृ॒तमिति॑ सु-कृ॒तं |
| च॒ मे॒ | मे॒ वि॒त्तं |
| वि॒त्तञ्च॑ | च॒ मे॒ |
| मे॒ वेद्यं॓ | वेद्य॑ञ्च |
| च॒ मे॒ | मे॒ भू॒तं |
| भू॒तञ्च॑ | च॒ मे॒ |
| मे॒ भ॒वि॒ष्यत् | भ॒वि॒ष्यच्च॑ |
| च॒ मे॒ | मे॒ सु॒गं |
| सु॒गञ्च॑ | सु॒गमिति॑ सु-गं |
| च॒ मे॒ | मे॒ सु॒पथं॓ |

| | |
|---|---|
| सुपथञ्च | सुपथमिति सु-पथं |
| च मे | म ऋद्धं |
| ऋद्धञ्च | च मे |
| म ऋद्धिः | ऋद्धिश्च |
| च मे | मे क्लृप्तं |
| क्लृप्तञ्च | च मे |
| मे क्लृप्तिः | क्लृप्तिश्च |
| च मे | मे मतिः |
| मतिश्च | च मे |
| मे सुमतिः | सुमतिश्च |
| सुमतिरिति सु-मतिः | च मे |
| म इति मे | |

❄❄❄❄❄❄❄❄❄

## तृतीयोऽनुवाकः

| | |
|---|---|
| शञ्च | च मे |
| मे मयः | मयश्च |
| च मे | मे प्रियं |
| प्रियञ्च | च मे |
| मेऽनुकामः | अनुकामश्च |
| अनुकाम इत्यनु -कामः | च मे |
| मे कामः | कामश्च |
| च मे | मे सौमनसः |
| सौमनसश्च | च मे |
| मे भद्रं | भद्रञ्च |
| च मे | मे श्रेयः |
| श्रेयश्च | च मे |
| मे वस्यः | वस्यश्च |
| च मे | मे यशः |
| यशश्च | च मे |
| मे भगः | भगश्च |
| च मे | मे द्रविणं |
| द्रविणञ्च | च मे |
| मे यन्ता | यन्ता च |
| च मे | मे धर्त्ता |

| | |
|---|---|
| धर्त्ता च | च मे |
| मे क्षेमः | क्षेमश्च |
| च मे | मे धृतिः |
| धृतिश्च | च मे |
| मे विश्वं | विश्वञ्च |
| च मे | मे महः |
| महश्च | च मे |
| मे संवित् | संविच्च |
| संविदिति सं-वित् | च मे |
| मे ज्ञात्रं | ज्ञात्रञ्च |
| च मे | मे सूः |
| सूश्च | च मे |
| मे प्रसूः | प्रसूश्च |
| प्र सूरिति प्र-सूः | च मे |
| मे सीरं | सीरञ्च |
| च मे | मे लयः |

| | |
|---|---|
| लयश्च | च मे |
| म ऋतं | ऋतञ्च |
| च मे | मेऽमृतं |
| अमृतञ्च | च मे |
| मेऽयक्ष्मं | अयक्ष्मञ्च |
| च मे | मेऽनामयत् |
| अनामयच्च | च मे |
| मे जीवातुः | जीवातुश्च |
| च मे | मे दीर्घायुत्वं |
| दीर्घायुत्वञ्च | दीर्घायुत्वमिति दीर्घायु -त्वं |
| च मे | मेऽनमित्रं |
| अनमित्रञ्च | च मे |
| मेऽभयं | अभयञ्च |
| च मे | मे सुगं |
| सुगञ्च | सुगमिति सु-गं |
| च मे | मे शयनं |
| शयनञ्च | च मे |

मे सूषा
सूषा च
सूषेति सु-उषा
च मे
मे सुदिनं
सुदिनञ्च
सुदिनमिति सु-दिनं
च मे
म इति मे

*********

## चतुर्थोऽनुवाकः

ऊर्क् च
च मे
मे सूनृता
सूनृता च
च मे
मे पयः
पयश्च
च मे
मे रसः
रसश्च
च मे
मे घृतं
घृतञ्च
च मे
मे मधु
मधु च
च मे
मे सग्धिः
सग्धिश्च
च मे
मे सपीतिः
सपीतिश्च
सपीतिरिति स-पीतिः
च मे
मे कृषिः
कृषिश्च
च मे
मे वृष्टिः
वृष्टिश्च
च मे
मे जैत्रं
जैत्रञ्च
च मे
म औद्भिद्यं
औद्भिद्यञ्च
औद्भिद्यमित्यौत्-भिद्यं
च मे
मे रयिः
रयिश्च
च मे
मे रायः
रायश्च
च मे
मे पुष्टं
पुष्टञ्च
च मे
मे पुष्टिः
पुष्टिश्च
च मे
मे विभु

| | |
|---|---|
| विभु च | विभ्विति वि-भु |
| च मे | मे प्रभु |
| प्रभु च | प्रभ्विति प्र-भु |
| च मे | मे बहु |
| बहु च | च मे |
| मे भूयः | भूयश्च |
| च मे | मे पूर्णं |
| पूर्णञ्च | च मे |
| मे पूर्णतरं | पूर्णतरञ्च |
| पूर्णतरमिति पूर्ण -तरं | च मे |
| मेऽक्षितिः | अक्षितिश्च |
| च मे | मे कूयवाः |
| कूयवाश्च | च मे |
| मेऽन्नं | अन्नञ्च |
| च मे | मेऽक्षुत् |
| अक्षुच्च | च मे |
| मे व्रीहयः | व्रीहयश्च |

| | |
|---|---|
| च मे | मे यवाः |
| यवाश्च | च मे |
| मे माषाः | माषाश्च |
| च मे | मे तिलाः |
| तिलाश्च | च मे |
| मे मुद्गाः | मुद्गाश्च |
| च मे | मे खल्वाः |
| खल्वाश्च | च मे |
| मे गोधूमाः | गोधूमाश्च |
| च मे | मे मसुराः |
| मसुराश्च | च मे |
| मे प्रियङ्गवः | प्रियङ्गवश्च |
| च मे | मेऽणवः |

अर्ण॑वश्च च मे

मे श्यामाका᳚ः श्यामाका᳚श्च

च मे मे नीवारा᳚ः

नीवारा᳚श्च च मे

म इति॑ मे

## पञ्चमोऽनुवाकः

अश्मा॑ च च मे

मे मृत्ति॑का मृत्ति॑का च

च मे मे गिरय॑ः

गिरय॑श्च च मे

मे पर्व॑ताः पर्व॑ताश्च

च मे मे सिक॑ताः

सिक॑ताश्च च मे

मे वनस्पत॑यः वनस्पत॑यश्च

च मे मे हिर॑ण्यं

हिर॑ण्यञ्च च मे

मेऽय॑ः अय॑श्च

च मे मे सीस᳚ं

सीस॑ञ्च च मे

मे त्रपु॑ः त्रपु॑श्च

च मे मे श्यामं

श्यामञ्च॑ च मे

मे लोहं लोहञ्च॑

च मे मेऽग्निः

अग्निश्च॑ च मे

म आप॑ः आप॑श्च

च मे मे वीरुध॑ः

वीरुध॑श्च च मे

म ओष॑धयः ओष॑धयश्च

च मे मे कृष्टपच्यं

कृष्टपच्यञ्च॑ कृष्टपच्यमिति॑ कृष्ट-पच्यं

| | |
|---|---|
| च मे | मेऽकृष्टपच्यं |
| अकृष्टपच्यञ्च | अकृष्टपच्यमित्यकृष्ट-पच्यं |
| च मे | मे ग्राम्याः |
| ग्राम्याश्च | च मे |
| मे पशवः | पशव आरण्याः |
| आरण्याश्च | च यज्ञेन |
| यज्ञेन कल्पन्तां | कल्पन्तां वित्तं |
| वित्तञ्च | च मे |
| मे वित्तिः | वित्तिश्च |
| च मे | मे भूतं |
| भूतञ्च | च मे |
| मे भूतिः | भूतिश्च |
| च मे | मे वसु |
| वसु च | च मे |
| मे वसतिः | वसतिश्च |
| च मे | मे कर्म |
| कर्म च | च मे |
| मे शक्तिः | शक्तिश्च |

| | |
|---|---|
| च मे | मेऽर्थः |
| अर्थश्च | च मे |
| म एमः | एमश्च |
| च मे | म इतिः |
| इतिश्च | च मे |
| मे गतिः | गतिश्च |
| च मे | म इति मे |

## षष्ठोऽनुवाकः

| | |
|---|---|
| अग्निश्च | च मे |
| म इन्द्रः | इन्द्रश्च |
| च मे | मे सोमः |
| सोमश्च | च मे |
| म इन्द्रः | इन्द्रश्च |
| च मे | मे सविता |
| सविता च | च मे |

| | |
|---|---|
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ सर॑स्वती |
| सर॑स्वती च | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ पू॒षा |
| पू॒षा च॑ | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ बृ॒ह॒स्पति॑ः |
| बृ॒ह॒स्पति॑श्च | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ मि॒त्रः |
| मि॒त्रश्च॑ | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ वरु॑णः |
| व॒रु॑णश्च | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ त्वष्टा᳚ |

| | |
|---|---|
| त्वष्टा॑ च | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ धा॒ता |
| धा॒ता च॑ | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ विष्णु॑ः |
| विष्णु॑श्च | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ऽश्विनौ᳚ |
| अ॒श्विनौ॑ च | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ म॒रुत॑ः |
| म॒रुत॑श्च | च॒ मे॒ |
| म॒ इन्द्र॑ः | इन्द्र॑श्च |
| च॒ मे॒ | मे॒ विश्वे᳚ |
| विश्वे॑ च | च॒ मे॒ |
| मे॒ दे॒वाः | दे॒वा इन्द्र॑ः |

| | |
|---|---|
| इन्द्रश्च | च मे |
| मे पृथिवी | पृथिवी च |
| च मे | म इन्द्रः |
| इन्द्रश्च | च मे |
| मेऽन्तरिक्षं | अन्तरिक्षञ्च |
| च मे | म इन्द्रः |
| इन्द्रश्च | च मे |
| मे द्यौः | द्यौश्च |
| च मे | म इन्द्रः |
| इन्द्रश्च | च मे |
| मे दिशः | दिशश्च |
| च मे | म इन्द्रः |
| इन्द्रश्च | च मे |
| मे मूर्द्धा | मूर्द्धा च |
| च मे | म इन्द्रः |
| इन्द्रश्च | च मे |
| मे प्रजापतिः | प्रजापतिश्च |
| प्रजापतिरिति प्रजा-पतिः | च मे |
| म इन्द्रः | इन्द्रश्च |
| च मे | म इति मे |

## सप्तमोऽनुवाकः

| | |
|---|---|
| अगुंशुश्च | च मे |
| मे रश्मिः | रश्मिश्च |
| च मे | मेऽदाभ्यः |
| अदाभ्यश्च | च मे |
| मेऽधिपतिः | अधिपतिश्च |
| अधिपतिरित्यधि-पतिः | च मे |
| म उपागुंशुः | उपागुंशुश्च |
| उपागुंशुरित्युप -अगुंशुः | च मे |
| मेऽन्तर्यामः | अन्तर्यामश्च |
| अन्तर्याम इत्यन्तः-यामः | च मे |
| म ऐन्द्रवायवः | ऐन्द्रवायवश्च |

| | |
|---|---|
| ऐन्द्रवायव इत्यैन्द्र-वायवः | च मे |
| मे मैत्रावरुणः | मैत्रावरुणश्च |
| मैत्रावरुण इति मैत्रा -वरुणः | च मे |
| म आश्विनः | आश्विनश्च |
| च मे | मे प्रतिप्रस्थानः |
| प्रतिप्रस्थानश्च | प्रतिप्रस्थान इति प्रति-प्रस्थानः |
| च मे | मे शुक्रः |
| शुक्रश्च | च मे |
| मे मन्थी | मन्थी च |
| च मे | म आग्रयणः |
| आग्रयणश्च | च मे |
| मे वैश्वदेवः | वैश्वदेवश्च |
| वैश्वदेव इति वैश्व -देवः | च मे |
| मे ध्रुवः | ध्रुवश्च |
| च मे | मे वैश्वानरः |
| वैश्वानरश्च | च मे |
| म ऋतुग्रहाः | ऋतुग्रहाश्च |

| | |
|---|---|
| ऋतुग्रहा इतृतु-ग्रहाः | च मे |
| मेऽतिग्राह्याः | अतिग्राह्याश्च |
| अतिग्राह्या इत्यति-ग्राह्याः | च मे |
| म ऐन्द्राग्नः | ऐन्द्राग्नश्च |
| ऐन्द्राग्न इत्यैन्द्र-अग्नः | च मे |
| मे वैश्वदेवः | वैश्वदेवश्च |
| वैश्वदेव इति वैश्व-देवः | च मे |
| मे मरुत्वतीयाः | मरुत्वतीयाश्च |
| च मे | मे माहेन्द्रः |
| माहेन्द्रश्च | माहेन्द्र इति माहा-इन्द्रः |
| च मे | म आदित्यः |
| आदित्यश्च | च मे |
| मे सावित्रः | सावित्रश्च |
| च मे | मे सारस्वतः |
| सारस्वतश्च | च मे |
| मे पौष्णः | पौष्णश्च |

च मे मे पात्नीवतः
पात्नीवतश्च पात्नीवत इति पात्नी-वतः
च मे मे हारियोजनः
हारियोजनश्च हारियोजन इति हारि -योजनः
च मे म इति मे

## अष्टमोऽनुवाकः

इध्मश्च च मे
मे बर्हिः बर्हिश्च
च मे मे वेदिः
वेदिश्च च मे
मे धिष्णियाः धिष्णियाश्च
च मे मे स्रुचः
स्रुचश्च च मे
मे चमसाः चमसाश्च
च मे मे ग्रावाणः

ग्रावाणश्च च मे
मे स्वरवः स्वरवश्च
च मे म उपरवाः
उपरवाश्च उपरवा इत्युप-रवाः
च मे मेऽधिषवणे
अधिषवणे च अधिषवणे इत्यधि-सवने
च मे मे द्रोणकलशः
द्रोणकलशश्च द्रोणकलश इति द्रोण-कलशः
च मे मे वायव्यानि
वायव्यानि च च मे
मे पूतभृत् पूतभृच्च
पूतभृदिति पूत-भृत् च मे
म आधवनीयः आधवनीयश्च
आधवनीय इत्या-धवनीयः च मे
म आग्नीध्रं आग्नीध्रञ्च
आग्नीध्रमित्याग्नि-इध्रं च मे

मे हविर्धानं हविर्धानञ्च

हविर्धानमिति हविः -धानं च मे

मे गृहाः गृहाश्च

च मे मे सदः

सदश्च च मे

मे पुरोडाशाः पुरोडाशाश्च

च मे मे पचताः

पचताश्च च मे

मेऽवभृथः अवभृथश्च

अवभृथ इत्यव -भृथः च मे

मे स्वगाकारः स्वगाकारश्च

स्वगाकार इति स्वगा -कारः च मे

म इति मे

## नवमोऽनुवाकः

अग्निश्च च मे

मे घर्मः घर्मश्च

च मे मेऽर्कः

अर्कश्च च मे

मे सूर्यः सूर्यश्च

च मे मे प्राणः

प्राणश्च प्राण इति प्र-अनः

च मे मेऽश्वमेधः

अश्वमेधश्च अश्वमेध इत्यश्व-मेधः

च मे मे पृथिवी

पृथिवी च च मे

मेऽदितिः अदितिश्च

चमे मे दितिः

दितिश्च च मे

मे द्यौः द्यौश्च

च मे मे शक्वरीः

| | |
|---|---|
| शक्करीरङ्गुलयः | अङ्गुलयो दिशः |
| दिशश्च | च मे |
| मे यज्ञेन | यज्ञेन कल्पन्तां |
| कल्पन्तामृक् | ऋक् च |
| च मे | मे साम |
| साम च | च मे |
| मे स्तोमः | स्तोमश्च |
| च मे | मे यजुः |
| यजुश्च | च मे |
| मे दीक्षा | दीक्षा च |
| च मे | मे तपः |
| तपश्च | च मे |
| म ऋतुः | ऋतुश्च |
| च मे | मे व्रतं |
| व्रतञ्च | च मे |
| मेऽहोरात्रयोः | अहोरात्रयोर्वृष्ट्या |
| अहोरात्रयोरित्यहः -रात्रयोः | वृष्ट्या बृहद्रथन्तरे |
| बृहद्रथन्तरे च | बृहद्रथन्तरे इति बृहत्-रथन्तरे |
| च मे | मे यज्ञेन |
| यज्ञेनकल्पेतां | कल्पेतामिति कल्पेतां |

*********

## दशमोऽनुवाकः

| | |
|---|---|
| गर्भाश्च | च मे |
| मे वत्साः | वत्साश्च |
| च मे | मे त्र्यविः |
| त्र्यविश्च | त्र्यविरिति त्रि-अविः |
| च मे | मे त्र्यवी |
| त्र्यवी च | त्र्यवीति त्रि -अवी |
| च मे | मे दित्यवाट् |
| दित्यवाट् च | दित्यवाडिति दित्य-वाट् |
| च मे | मे दित्यौही |
| दित्यौही च | च मे |
| मे पञ्चाविः | पञ्चाविश्च |

पञ्चाविरिति पञ्च-अविः
च मे
मे पञ्चावी
पञ्चावी च
पञ्चावीति पञ्च-अवी
च मे
मे त्रिवत्सः
त्रिवत्सश्च
त्रिवत्स इति त्रि-वत्सः
च मे
मे त्रिवत्सा
त्रिवत्सा च
त्रिवत्सेति त्रि-वत्सा
च मे
मे तुर्यवाट्
तुर्यवाट् च
तुर्यवाडिति तुर्य -वाट्
च मे
मे तुर्यौही
तुर्यौही च
च मे
मे पष्ठवात्
पष्ठवाच्च
पष्ठवादिति पष्ठ-वात्
च मे
मे पष्ठौही
पष्ठौही च
च मे
म उक्षा
उक्षा च
च मे
मे वशा
वशा च
च मे
म ऋषभः
ऋषभश्च

च मे
मे वेहत्
वेहच्च
च मे
मेऽनड्वान्
अनड्वाञ्च
च मे
मे धेनुः
धेनुश्च
च मे
मआयुः
आयुर्यज्ञेन
यज्ञेन कल्पतां
कल्पतां प्राणः
प्राणो यज्ञेन
प्राण इति प्र अनः
यज्ञेन कल्पतां
कल्पतामपानः
अपानो यज्ञेन
अपान इत्यप-अनः
यज्ञेन कल्पतां
कल्पतां व्यानः
व्यानो यज्ञेन
व्यान इति वि अनः
यज्ञेन कल्पतां
कल्पतां चक्षुः
चक्षुर्यज्ञेन
यज्ञेन कल्पतां
कल्पताꣳश्रोत्रं
श्रोत्रं यज्ञेन
यज्ञेन कल्पतां
कल्पतां मनः
मनो यज्ञेन
यज्ञेन कल्पतां

| | |
|---|---|
| कल्पतां वाक् | वाग्यज्ञेन |
| यज्ञेन कल्पतां | कल्पतामात्मा |
| आत्मा यज्ञेन | यज्ञेन कल्पतां |
| कल्पतां यज्ञः | यज्ञो यज्ञेन |
| यज्ञेन कल्पतां | कल्पतामिति कल्पतां |

## एकादशोऽनुवाकः

| | |
|---|---|
| एका च | च मे |
| मे तिस्रः | तिस्रश्च |
| च मे | मे पञ्च |
| पञ्च च | च मे |
| मे सप्त | सप्त च |
| च मे | मे नव |
| नव च | च मे |
| म एकादश | एकादश च |
| च मे | मे त्रयोदश |
| त्रयोदश च | त्रयोदशेति त्रयः-दश |
| च मे | मे पञ्चदश |
| पञ्चदश च | पञ्चदशेति पञ्च-दश |
| च मे | मे सप्तदश |
| सप्तदश च | सप्तदशेति सप्त-दश |
| च मे | मे नवदश |
| नवदश च | नवदशेति नव-दश |
| च मे | म एकविंशतिः |
| एकविंशतिश्च | एकविंशतिरित्येक-विंशतिः |
| च मे | मे त्रयोविंशतिः |
| त्रयो विंशतिश्च | त्रयो विंशतिरिति त्रयः-विंशतिः |
| च मे | मे पञ्च विंशतिः |
| पञ्च विंशतिश्च | पञ्च विंशतिरिति पञ्च-विंशतिः |
| च मे | मे सप्तविंशतिः |
| सप्तविंशतिश्च | सप्तविंशतिरिति सप्त-विंशतिः |
| च मे | मे नवविंशतिः |
| नव विंशतिश्च | नव विंशतिरिति नव-विंशतिः |
| च मे | म एकत्रिंशत् |

| | |
|---|---|
| एकत्रिगुंशच्च | एकत्रिगुंशदित्येक-त्रिगुंशत् |
| च मे | मे त्रयस्त्रिगुंशत् |
| त्रयस्त्रिगुंशच्च | त्रयस्त्रिगुंशदिति त्रयः -त्रिगुंशत् |
| च मे | मे चतस्रः |
| चतस्रश्च | च मे |
| मेऽष्टौ | अष्टौ च |
| च मे | मे द्वादश |
| द्वादश च | च मे |
| मे षोडश | षोडश च |
| च मे | मे विगुंशतिः |
| विगुंशतिश्च | च मे |
| मे चतुर्विगुंशतिः | चतुर्विगुंशतिश्च |
| चतुर्विगुंशतिरितिचतुः – विगुंशतिः | च मे |
| मेऽष्टाविगुंशतिः | अष्टाविगुंशतिश्च |
| अष्टाविगुंशतिरित्यष्टा-विगुंशतिः | च मे |
| मे द्वात्रिगुंशत् | द्वात्रिगुंशच्च |
| च मे | मे षड्त्रिगुंशत् |
| षड्त्रिगुंशच्च | षड्त्रिगुंशदिति षट्-त्रिगुंशत् |

| | |
|---|---|
| च मे | मे चत्वारिगुंशत् |
| चत्वारिगुंशच्च | च मे |
| मे चतुश्चत्वारिगुंशत् | चतुश्चत्वारिगुंशच्च |
| चतुश्चत्वारिगुंशदिति चतुः-चत्वारिगुंशत् | च मे |
| मेऽष्टाचत्वारिगुंशत् | अष्टाचत्वारिगुंशच्च |
| अष्टाचत्वारिगुंशदित्यष्टा-चत्वारिगुंशत् | च मे |
| मे वाजः | वाजश्च |
| च प्रसवः | प्रसवश्च |
| प्रसव इति प्र -सवः | चापिजः |
| अपिजश्च | अपिज इत्यपि -जः |
| च क्रतुः | क्रतुश्च |
| च सुवः | सुवश्च |
| च मूर्द्धा | मूर्द्धा च |
| चव्यश्नियः | व्यश्नियश्च |
| व्यश्निय इति वि- अश्नियः | चान्त्यायनः |
| आन्त्यायनश्च | चान्त्यः |
| अन्त्यश्च | च भौवनः |
| भौवनश्च | च भुवनः |

भुव॑नश्च चाधि॑पतिः

अधि॑पतिश्च अधि॑पति॒रित्यधि॑ -प॒ति॒ः

चेति॑ च

इडा॑दे॒व॒हूः दे॒व॒हूर्मनु॑ः

दे॒व॒हूरिति॑ देव-हूः मनु॑र्यज्ञ॒नीः

य॒ज्ञ॒नीर्बृह॒स्पतिः य॒ज्ञ॒नीरिति॑ यज्ञ-नीः

बृह॒स्पति॑रुक्था म॒दानि॑ उ॒क्था॒ म॒दानि॑ शगु॑ंसिषत्

उ॒क्था॒म॒दानीत्यु॑क्था -म॒दानि॑ श॒गुं॒सि॒ष॒द्विश्वे᳚

विश्वे॑दे॒वाः दे॒वास्सू᳚क्त॒वाचः

सू॒क्त॒वा॒चः पृथि॑वि सू॒क्त॒वा॒च इति॑सूक्त -वाच॑ः

पृथि॑विमातः मा॒त॒र्मा

मा मा᳚ मा॒हि॒गुं॒सी॒ः

हि॒गुं॒सी॒र्मधु॑ मधु॑मनिष्ये

म॒नि॒ष्ये॒ मधु॑ मधु॑ जनिष्ये

ज॒नि॒ष्ये॒ मधु॑ मधु॑ वक्ष्यामि

व॒क्ष्या॒मि॒ मधु॑ मधु॑ वदिष्यामि

व॒दि॒ष्या॒मि॒ मधु॑मतीं मधु॑मतीन्दे॒वेभ्य॑ः

मधु॑मती॒मिति॒ मधु॑ म॒तीं दे॒वेभ्यो॒ वाच᳚ं

वाच॑मुद्यासं उ॒द्या॒स॒गुं॒शु॒श्रूषेण्या᳚ं

शु॒श्रू॒षेण्या᳚ं मनु॒ष्ये᳚भ्यः म॒नु॒ष्ये᳚भ्य॒स्तं

तं मा᳚ मा॒ दे॒वाः

दे॒वा अ॑वन्तु अ॒व॒न्तु॒ शो॒भायै᳚

शो॒भायै॑ पि॒तरः पि॒तरोऽनु॑

अनु॑मदन्तु म॒दु॒न्त्विति॑मदन्तु

**ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः**



## लि॒ङ्गार्चनमन्त्राः

नि॑र्धनपत॒ये॒ नमः निर्धनपतान्तिका॒य॒ नमः

ऊर्ध्वा॑य॒ नमः ऊर्ध्वलिङ्गा॒य॒ नमः

हिरण्या॒य॒ नमः हिरण्यलिङ्गा॒य॒ नमः

सुवर्णा॑य॒ नमः सुवर्णलिङ्गा॒य॒ नमः

दिव्या॒य॒ नमः दिव्यलिङ्गा॒य॒ नमः

भवा॒य॒ नमः भवलिङ्गा॒य॒ नमः

शर्वा॑य॒ नमः शर्वलिङ्गा॒य॒ नमः

शिवा॒य॒ नमः शिवलिङ्गा॒य॒ नमः

ज्वला॒य॒ नमः ज्वललिङ्गा॒य॒ नमः

आत्मा॒य॒ नमः आत्मलिङ्गा॒य॒ नमः

परमा॒य॒ नमः परमलिङ्गा॒य॒ नमः

एतत् सोमस्य॑ सू॒र्य॑स्य॒ सर्वलिङ्गग्ँ स्थाप॒य॒ति॒ पाणि मन्त्रं॑ प॒वि॒त्रं॑॥

स॒द्योजा॒तं प्र॑पद्या॒मि॒ स॒द्योजा॒ता॒य॒ वै नमो॒ नमः॑।

भ॒वे भ॑वे॒नाति॑भवे भवस्व॒ मां । भ॒वोद्भ॑वा॒य॒ नमः॑।

वा॒म॒दे॒वा॒य॒ नमो॑ ज्ये॒ष्ठा॒य॒ नमः॑ श्रे॒ष्ठा॒य॒ नमो॑ रु॒द्रा॒य॒ नम॒ः

काला॑य॒ नम॒ः कल॑विकरणा॒य॒ नमो॒ बल॑विकरणा॒य॒ नमो॒

बला॑य॒ नमो॒ बल॑प्रमथना॒य॒

नम॒स्सर्व॑भूतदमना॒य॒ नमो॑ म॒नोन्म॑ना॒य॒ नमः॑।

अ॒घोरे॑भ्योऽथ॒घोरे॑भ्यो॒ घोर॒घोर॑तरेभ्यः।

सर्वे॑भ्यस्सर्व॒शर्वे॑भ्यो॒ नम॑स्ते अस्तु रु॒द्ररू॑पेभ्यः।

तत्पुरु॑षाय वि॒द्महे॑ महादे॒वाय॑ धीमहि।

तन्नो॑ रुद्रः प्रचो॒दया॑त् ।

ईशानस्सर्व॑विद्या॒नामीश्वरस्सर्व॑भूता॒नां

ब्रह्माधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो मे॑ अस्तु सदाशि॒वोम्।

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतये

अम्बिकापतय उमापतये पशुपतये नमोनमः।

ऋतगुंसत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं।

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः।

सर्वो वै रुद्र-स्तस्मै रुद्राय नमो अस्तु।

पुरुषो वै रुद्रस्सन्महो नमो नमः।

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्।

सर्वोह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे।

वोचेम शन्तमगुं हृदे।

सर्वोह्येष रुद्र -स्तस्मै रुद्राय नमो अस्तु॥

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय

त्र्यम्बकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय

नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय

सदाशिवाय शङ्कराय श्रीमन्महादेवाय नमः

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय

हरिवोवर्द्धमानः ।

यदास्तोतृभ्यो महिगोत्रारुजासिभूयिष्टभाजो

अधतेस्स्याम ।

ब्रह्म प्रावादिष्मतन्नो माहासीत् ॥

**ॐ शान्तिः शान्तिः शान्तिः**

